# श्रीकुमारस्तुतिः

Shri Kumarastuti

sanskritdocuments.org

May 12, 2018

Shri Kumarastuti

# श्रीकुमारस्तुतिः

## Sanskrit Document Information

Text title : kumArastutiH

File name : kumArastutiH.itx

Category : subrahmanya

Location : doc_subrahmanya

Proofread by : NA

Description/comments : shivapurANam 2.4.6 verses 4-22

Source : shivapurANam, saMhitA 2 (rudrasaMhitA), khaNDaH 4 (kumArakhaNDaH) adhyAyaH 06

Latest update : May 12, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

May 12, 2018

*sanskritdocuments.org*

# श्रीकुमारस्तुतिः

विप्र उवाच -
श्रृणु स्वामिन्वचो मेद्य कष्टं मे विनिवारय ।
सर्वब्रह्माण्डनाथस्त्वमतस्ते शरणं गतः ॥ १॥

अजमेधाध्वरं कर्तुमारम्भं कृतवानहम् ।
सोऽजो गतो गृहान्मे हि त्रोटयित्वा स्वबन्धनम् ॥ २॥

न जाने स गतः कुत्राऽन्वेषणं तत्कृतं बहु ।
न प्राप्तोऽतस्स बलवान् भङ्गो भवति मे क्रतोः ॥ ३॥

त्वयि नाथे सति विभो यज्ञभङ्गः कथं भवेत् ।
विचार्य्यैवाऽखिलेशान काम पूर्णं कुरुष्व मे ॥ ४॥

त्वां विहाय शरण्यं कं यायां शिवसुत प्रभो ।
सर्वब्रह्माण्डनाथं हि सर्वामरसुसेवितम् ॥ ५॥

दीनबन्धुर्दयासिन्धुस्सुसेव्या भक्तवत्सलः ।
हरिब्रह्मादिदेवैश्च सुस्तुतः परमेश्वरः ॥ ६॥

पार्वतीनन्दनस्स्कन्दः परमेकः परन्तपः ।
परमात्माऽत्मदस्स्वामी सतां च शरणार्थिनाम् ॥ ७॥

दीनानाथ महेश शङ्करसुत त्रैलोक्यनाथ प्रभो
मायाधीश समागतोऽस्मि शरणं मां पाहि विप्रप्रिय ।
त्वं सर्वप्रभुप्रियः खिलविदब्रह्मादिदेवैस्तुत-
स्त्वं मायाकृतिरात्मभक्तसुखदो रक्षापरो मायिकः ॥ ८॥

भक्तप्राणगुणाकरस्त्रिगुणतो भिन्नोऽसि शम्भुप्रियः
शम्भुः शम्भुसुतः प्रसन्नसुखदस्सच्चित्स्वरूपो महान् ।
सर्वज्ञस्त्रिपुरघ्नशङ्करसुतः सत्प्रेमवश्यस्सदा
षड्वक्त्रः प्रियसाधुरानतप्रियस्सर्वेश्वरश्शङ्करः ।

साधुद्रोहकरघ्न शङ्करगुरो ब्रह्माण्डनाथो प्रभुः
    सर्वेषाममरादिसेवितपदो मां पाहि सेवाप्रिय ॥ ९॥

वैरिभयङ्कर शङ्कर जनशरणस्य वन्दे तव पदपद्मं सुखकरणस्य ।
विज्ञप्तिं मम कर्णे स्कन्द निधेहि निजभक्तिं जनचेतसि सदा विधेहि ॥ १०॥

करोति किं तस्य बली विपक्षोदक्षोऽपि पक्षोभयापार्श्वगुप्तः ।
किन्तक्षकोप्यामिषभक्षको वा त्वं रक्षको यस्य सदक्षमानः ॥ ११॥

विबुधगुरुरपि त्वां स्तोतुमीशो न हि स्यात्-
    कथय कथमहं स्यां मन्दबुद्धिर्वराच्र्यः ।
शुचिरशुचिरनार्यो यादृशस्तादृशो वा
    पदकमल परागं स्कन्द ते प्रार्थयामि ॥ १२॥

हे सर्वेश्वर भक्तवत्सल कृपासिन्धो त्वदीयोऽस्म्यहं
    भृत्यस्स्वस्य न सेवकस्य गणपस्याऽऽगश्शतं सत्प्रभो ।
भक्तिं क्वापि कृतां मनागपि विभो जानासि भृत्यार्तिहा
    त्वत्तो नास्त्यपरोऽविता न भगवन् मत्तो नरः पामरः ॥ १३॥

कल्याणकर्ता कलिकल्मषघ्नः कुबेरबन्धुः करुणार्द्रचित्तः ।
त्रिषड्कनेत्रो रसवक्त्रशोभी यज्ञं प्रपूर्णं कुरु मे गुह त्वम् ॥ १४॥

रक्षकस्त्वं त्रिलोकस्य शरणागतवत्सलः ।
यज्ञकर्ता यज्ञभर्ता हरसे विघ्नकारिणाम् ॥ १५॥

विघ्नवारण साधूनां सर्गकारण सर्वतः ।
पूर्णं कुरु ममेशान सुतयज्ञ नमोऽस्तु ते ॥ १६॥

सर्वत्राता स्कन्द हि त्वं सर्वज्ञाता त्वमेव हि ।
सर्वेश्वरस्त्वमीशानो निवेशसकलाऽवनः ॥ १७॥

संगीतज्ञस्त्वमेवासि वेदविज्ञः परः प्रभुः ।
सर्वस्थाता विधाता त्वं देवदेवस्सतां गतिः ॥ १८॥

भवानीनन्दनश्शम्भुतनयो वयुनः स्वराट् ।
ध्याता ध्येयः पितृणां हि पिता योनिः सदात्मनाम् ॥ १९॥

इति श्रीशिवमहापुराणे द्वितीयायां रुद्रसंहितायां चतुर्थे कुमारखण्डे
कुमाराऽद्भुतचरितवर्णनं नाम षष्ठोऽध्यायान्तर्गतं

श्रीकुमारस्तुतिः सम्पूर्णा ॥

shivapurANam, saMhitA 2 (rudrasaMhitA), khaNDaH 4 (kumArakhaNDaH)

adhyAyaH 6

Verses 4-22

NA

*Shri Kumarastuti*

pdf was typeset on May 12, 2018

Please send corrections to *sanskrit@cheerful.com*